# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

## सत्रान्तपरीक्षा – डिसेम्बर – २०१८

**कक्षा** – शास्त्रीप्रथमवर्षम् (SEM- 1) **प्रश्नपत्रम्** – ५ **गुणाः -** ७०

**विषयः -** साहित्यम् **कोड – CC 1.1.1** **समयः -** ०२ तः ०५

**दिनाङ्कः -** १९/१२/२०१८ **सन्दर्भग्रन्थः** – साहित्यदर्पणः

**(NEW & OLD)**

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितेभ्यः कयोश्चिद् द्वयोः ससन्दर्भं व्याख्यां कुरुत|** १०

१. चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ॥

२. अदोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्|
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति||

३. उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः ||

**प्रश्नः – २ आचार्यविश्वनाथस्य जीवनपरिचयं लिखत|** १०

**(अथवा)**

**मम्मटोक्तं काव्यलक्षणमुल्लिख्य विश्वनाथोक्तदिशा सन्दूष्य युक्तायुक्तत्वे विचार्येताम्|**

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ३ कयोश्चिद् द्वयोः ससन्दर्भं व्याख्यां कुरुत|** १०

१) वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः।
व्याङ्गयो व्यन्जनया त्तः स्युस्तिस्रः शब्दस्य शक्तयः ॥

२) संङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च

३) मुख्यापार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते।
रूढेः प्रयोजनाद्वाऽसौ लक्षणा शक्तिरर्पिता ॥

**प्रश्नः – ४ वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः कारिकेयं साधुव्याख्येया।** १०

**(अथवा)**

**का नाम लक्षणा ? कुत्र कथं चाऽस्याः प्रयोगः ? कतिविधा च सा ? इति सोदाहरणं लिख्यताम् ।**

## तृतीयान्वितिः(Unit - 3)

**प्रश्नः – ५ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्यां कुरुत।** **१०**

१) अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये।
उपलक्षणहेतुत्वादेषा लक्षणलक्षणा॥

२) अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया॥

३) तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने।
तात्पर्यार्थं तदर्थं च वाक्यं तद्बोधकं परे॥

**प्रश्नः – ६ का नाम व्यञ्जना ? कुत्रोपयुज्यते ? कतिविधा च सा ? इति विविच्यताम्।** **१०**

**(अथवा)**

**तात्पर्यवृत्तिस्वीकारे का वाचोयुक्तिः ? साहित्यिकास्तां स्वीकुर्वन्तु न वा? विशदं विवेच्यताम्।**

## अन्वितयः १ – ३ (Unit 1 – 3)

**प्रश्नः – ७ दशानां प्रश्नानां लघूत्तरं लिखत।** **१०**

१) साहित्यदर्पणे कति परिच्छेदाः सन्ति ?

२) मम्मटाचार्यः काव्यस्य किं लक्षणमाह ?

३) साहित्यदर्पणस्य प्रथमपरिच्छेदस्य किं नाम ?

४) काव्यतो मोक्षप्राप्तिः कथं भवति ?

५) भोजराजेन किमुक्तं काव्यलक्षणम् ?

६) का नाम पदोच्चयस्य आसत्तिः ?

७) कदा लक्षणाः शुद्धाः भवन्ति ?

८) को नाम गुणः ?

९) का नाम आकांक्षा ?

१०) मुख्यार्थबाधो केन हेतुना भवति ?

११) का लक्षणा रूपकालंकारस्य बीजं भवति?

१२) प्रयोजने उपादानलक्षाणायाः किमुदाहरणम् ?

१३) वाच्यार्थस्यापरं नाम किम् ?

१४) व्यञ्जना कतिविधा ?

१५) आर्थी व्यञ्जनायाः कति भेदाः भवन्ति ?

*****************